Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 178 OLD 155 I

FOLIO 023

TITLE
सन्निकर्षविचारः
केशवैकरणम्

गणयतयेनमः प्रत्यक्षानुमितिशब्दभेदेन प्रमाचतुर्विधा-तत्रेंद्रियसन्निकर्षजन्यज्ञानत्वं
स्वं-जन्यज्ञानविषयत्वप्रयोजकसम्बन्धावच्छिन्नायाग्रहा-तेनजन्यज्ञानमात्रस्य बाह्यमनोयोगजन्यत्वेपि ना
तिप्रसंगः-जन्यज्ञानसामवच्छिन्नायाआत्ममनोयोगजन्यत्वायाः समवायप्रत्यासत्यवच्छिन्नायाः
नत्रलौकिकसन्निकर्षःषड्विधः-संयोगःसंयुक्तसमवायःसंयुक्तसमवेतसमवायः
समवायःसमवेतसमवायःविशेषणताचेति-अलौकिकसन्निकर्षस्त्रिविधःसामान्य
लक्षणायोगअधर्मेतद्वान्-एतेचत्वारःसामान्येनिअनुगतरूपेणहेतुत्वेनसंभवतिः
सर्वसाधारणानुगतस्यानतिप्रसक्तरूपस्यनलक्षणेपिदुर्वचत्वात्-नापिद्रव्यादिविषयकत्वं
किंचप्रत्यक्षंप्रतिचक्षुस्त्वगादीनांयोगादिसाधारणेनेंद्रियसंयोगत्वादिना-चक्षुरादिसाधा
रणेंद्रियस्यानुगतस्यनिर्वक्तुमशक्यत्वात्-नचेंद्रियेजातिविशेषः-तेजस्त्वेद्रव्यारंभक
संयोगात्-अथेंद्रियनिष्ठेषुएकत्वेषुजातिविशेषंस्वीकृत्यविजातीयएकत्ववत्संयोगादिनो
वहेतुतावाच्या-अथवाचक्षुरादिसंयोगेष्वेवजातिविशेषःकारणतावच्छेदकतयास्वीक्रिय
ते-तदभ्युपगमश्चावश्यकः-अन्यथाघटेत्वावच्छिन्नेंद्रियसंयोगादिनोद्रव्यप्रत्यक्षादिप्रसं
गात्-नचैवं-संभवत्येतादृशरीत्यानुगतरूपेणानुगतकार्यकारणभावः-किंत्वसामान्यो क्त-

इति कथाराजेति कलौ चौरद्यूतादिति ग्रहः परोधर्मः प्रजारक्षतुरिति युधिष्ठिरः सत्यवतोः पितापुत्रः संवादेनाहसीत्येतेनातियुधिष्ठिरस्यविद्वेषाद्राज्ञइति अथाह तंकेनापिधार्मिकस्यापितुल्येनो रिक्षासूचेजन्तीयमानेषुशूलेष्वारोपितेषुचौरादिषुपितुर्युधिष्ठिरस्य ग्रहोमोहमाहात्म्यमित्या श्रयधर्मतामितिवक्तोनाम [redacted]वेद्मईतिपूर्वपक्षः सिद्धांतोनैतादृशिपुत्रंपृच्छेतियच्चवक्तोधर्मस्यधर्मः नुभवेत्नन्वेतेनननुतर्हिकिमेवंधर्मीतस्सर्वविषयेसाहसस्यवक्तेराज्ञानहनेचन संकरःसांकर्यं देवदत्तमेदाप्तमितिअस्यचाग्निनःअथयदिज्ञानाग्निधर्मेतदाथसकथंचत्रयोवर्णाःक्षत्रविट्शू
द्रसंधिनिःशेषाब्रह्मनिबंधनाब्राह्मण

॥श्री॥

स्वस्ति श्रीमत्सौभाग्यसहाद्येषु भजननिरतानां
करणेषु

सन्निकर्ष

=घटे चक्षुःसंयोगः ८

कदाचिच्चक्षुर्घटकदाचिन्नस्यार्थानभिसादिनियमनिर्वाहायचाक्षुआदौचक्षुःसंयोगादीनांविशेषक्रा
रणतायाआवश्यकत्वात्एतादृशकार्यकारणभावंविनाप्युपपत्तेः॰अथविषयेंद्रियसन्निकर्षस्य
उक्तानुगतरूपेणहेतुताकल्प्यते॰ईंद्रियमनोयोगस्यचचक्षुर्मनोयोगत्वादिनाचाक्षुषत्वाद्य
वच्छेदेनप्रतिविशिष्यहेतुनेतिनचाक्षुषस्यार्थानाद्युपपत्तावनियमः॰चक्षुर्मनोयोगादिश्च
फलबलाच्चाक्षुषाव्यवहितपूर्वक्षणएवकल्प्यते॰अतोविषयस्थस्वार्थेंद्रियसंयोगमात्र
दशायांचक्षुषाचमनःसंयोगसत्वेचाक्षुषापत्तिरिष्टेतादृशफक्किकायाअनवतारइति
चेन्॰विषयेंद्रियसन्निकर्षस्यविशिष्यहेतुत्वानभ्युपगमेयत्रघटेचक्षुर्मात्रसन्नि
कर्षःनतुनरेघटचाक्षुषापत्तिर्वारयितुंशक्या॰हंतुनरेपटचाक्षुषोत्पत्तौतद्धेतुरोधेन
चक्षुर्मनोयोगस्यावश्यंकल्पनीयत्वात्॰यत्तुईंद्रियमनोयोगस्यविषयविशेषोपरक्तइत्यु
च्यते॰एवंचविषयनात्रसान्नस्याचाक्षुषत्वाद्यवच्छेदकत्वप्रसाक्षसेवचक्षु
र्मनोयोगादीनांहेतुताकल्प्यते॰उपदर्शितस्थलेपटचाक्षुषानुरोधेनपटरूपविषयाव
च्छेदेनैवचक्षुर्मनोयोगःकल्प्यते॰नतुघटावच्छेदेनापीतिनातिप्रसंगइति॰तदसत्॰तथासति

निविषयेंद्रियसन्निकर्षहेतुतावितरत्र संयोगादेः विषयेंद्रियसन्निकर्षभूत्यकाले तन्नद्विषयावच्छेदकं नेंद्रियमनोयोगाकल्पनादेवानिष्प्रसंगसाधारणसंभवादिति तस्माद्द्रव्यलौकिकचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वादिनाविशेष्यावच्छेदकसंबंधावच्छेदकतावच्छेदकसंबंधेन हेतुहेतुमद्भावः लौकिकस्यकार्यतावच्छेदकतावच्छेदकसंबंधेनोपनीतभानादौ नव्याभिचारः लौकिकस्पर्शनसाक्षात्करोमीतिप्रतीतिसाक्षिकोविषयताविशेषः गुणादिचाक्षुषाव्यवहितपूर्वक्षणेस्वाश्रयचक्षुःसंयोगादेरवश्यकत्वात्कथंव्याभिचारः यदिचएवविषयेसन्निकर्षोनूविषयोतरत्रस्पर्शनत्वापत्तिः यविषयतासंबंधेनचाक्षुषंप्रतिसमवायादिनाचक्षुःसंयोगादेर्हेतुतावर्त्यावाच्या तथाचविषयतासंबंधेनचाक्षुषाधिकरणगुणादौसमवायेनचक्षुःसंयोगाद्यभावान्नव्याभिचारः संभवतीतिमन्यसेनदाकार्यतावच्छेदकोद्रव्यविषयतानिवेश्योप्यसोदुवारः द्रव्यविषयकचाक्षुषत्वगुणादेर्

=६

विविषयतयानत्वाविविषयत्वालक्षणकार्यतावच्छेदकप्रत्यासत्त्याद्यविषयकचाक्षुष
त्वोत्पत्तेरिति चेन्न. कार्यतावच्छेदकोपलक्षितकार्याधिकरणकारणाभावो नव्यभिचा
रः. अपितु कार्यतावच्छेदकविशिष्टाधिकरणतदभावएव. प्रकृतेचद्रव्यत्वलौकिक
चाक्षुषादौगुणादेर्विषयत्वेपिद्रव्यत्वलौकिककत्वविशिष्टविषयतानाभ्युपगमेअ
तोनव्यभिचारः. आस्तांवाद्रव्यत्वलौकिककविषयतैवकार्यतावच्छेदकप्रत्यासत्तिः. का
र्यतावच्छेदकंतुशुद्धचाक्षुषत्वादिकमेव. नचैतादृशप्रत्यासत्त्याचाक्षुषत्वाद्यवच्छिन्नगुणा
दौअस्तीतिनव्यभिचारः. एकयुरुषीयेंद्रियसन्निकर्षान्युरुषीयतरीयप्रत्यक्षवारणा
यतसुरुषीयत्वंनिवेश्यैवकार्यकारणभावः स्वीकार्यः. प्रत्यक्षनिष्ठंतसुरुषीयत्वंचतदा
श्रयसमवेतत्वं. चक्षुरादिनिष्ठंतसुरुषीयत्वंचतन्मनःसंयोगित्वं. एवंचेंद्रियमनोयोग
स्यस्यातेनैवहेतुत्वेनकल्पनेः. सन्निकर्षकारणतावच्छेदककोटौतन्निवेशस्यावश्य २
कतयैवनियमनस्यादृष्टेक्षोपपत्तेः. अव्यवहितप्राक्क्षणताकारणतावच्छेदकविशि
ष्टकारणतायाएवप्रकृतेकल्पोपधानेतत्रोपगमात्. वस्तुतस्तुतत्तसुरुषीयचा

क्षुषश्चाग्रहे त्रज्ञनकतावच्छेदकतयातत्तत्सुरूपीयचक्षुरादिषु ज्ञातिरेकएवस्वीक्रियते. तत्तन्मनःसं
युक्तचक्षुःसंयोगत्वादिनाहेतुत्वेनतत्तन्मनःसंयुक्तचक्षुर्ज्ञानत्वेनवाहेतुत्वेकल्पितेगौरवंस्या
त्तत्तद्विशेषणविशेष्यभावेविनिगमनाविरहेणैकैकारणतायाहुत्यापत्त्याचअग्रहेहेतुतावच्छेदकगौरवंच. केचित्तु तत्तत्सुरूपीयचाक्षुषादौस
मवायादिनादीतेयंचक्षुःसंयोगत्वादिनाहेतुत्वेक्षयोपशमत्वादिनावाहेतुत्वेकल्पितेसंयोगादि नातत्तत्सुरूपी
यचक्षुर्ज्ञानादिनैवहेतुताकल्प्यते. अथैवंसंयोगादेरिंद्रियव्यापारताऽरूपपानिः. तत्रऊन्य
त्वेसतितज्जन्यजनकस्वेनतद्व्यापारत्वात्. तथाचेंद्रियस्यप्रसक्तप्रतिषेधकरणत्वे
वानिर्वहतीतिचेत्. एवंसतिएतदर्थंतत्तत्सुरूपीयत्वादिकंमानिनेयइत्यलंकिंकलोवच्छे
नैप्रतिसंयोगत्वेनसामान्यतएकहेतुत्वंकल्प्यतां. तत्तत्सुरूपीयचक्षुःसंयोगत्वादिनाहेतु
त्वेपिइंद्रियकरणतानिर्वाहायतत्तत्सामान्यतयाएकहेतुनायाअग्रहयकल्पनीयतया
साम्यादितिवदंतिवस्तुतस्तुचक्षुःसंयोगत्वादिनातत्तत्सन्निकर्षंहेतुत्वे. किंतुज्ञातित्व
विशेषसुरस्कारेणैव. अतएवज्ञानावच्छिन्नेंद्रियसन्निकर्षादितःप्रसक्तप्रतिषेधकारणा
रणतावच्छेदकतयाज्ञातिस्वीकारस्यानुभवसिद्धतयाचक्षुरादिनिर्वाह्योयंयोजनाभा

वा न॰ एवं च समवाये नविजातीय संयोगस्य हेतुता से त्स्यतीति॰ यत्तु संयोगेन संयुक्त रूपीयत्वस्य गु
रो र्हेतुत्वेन तयान संयुक्त रूपीय चक्षुः संयोगत्वादिना हेतुत्व मावश्यक मिति कथं चक्षुरादि
निवेशी विनाऽपपत्तिरिति॰ तदपि न॰ तत्संयुक्त रूपीय चाक्षुष जनक तावच्छेदक तत्संयो
गेन जाति भेदानाम भ्युपगमे नैवाति प्रसंग वारण संभवात्॰ तत्संयुक्त रूपीय चक्षुः सं
योगत्वादिना हेतुता या अनावश्यक त्वात्॰ एवं द्रव्य समवेत चाक्षुष तत्समवेत तत्सा
मवेत चाक्षुषादौ चक्षुः संयुक्त समवाय चक्षुः संयुक्त समवेत समवायत्वादिना
पि हेतुतावी ध्या॰ कारण तावच्छेदक प्रवेशे सति श्रोत्रं प्रतियोगिता॰ द्रव्य समवेत चा
या ५ क्षुषादावपि स्वाश्रय समवायादि संबंधेन चक्षुः संयोगत्वादिनैव हेतुता॰ चक्षुः
संयुक्त समवायत्वादिना प्रतियोगितासंबंधेन हेतुत्वेऽधिकरणे चक्षुरादि संयोगनि
रूपित संबंधस्य समवायीय प्रतियोगितायाश्च निवेशाधिक्येन गौरवादिति तु ३
३ यैः तथाहि॰ कालिकादि संबंधेन यः स्वाश्रयः तत्समवेत समवायेन यः स्वाश्रयः तत्समवायसंबंधेन चक्षुः सं

योगादि मात्र स्यात्समवायेन हेतुता एवं चाधिकरणीशे चक्षुः संयोगादेः समवायो मतइ यत्र
यनिविष्टः कैश्चित्समवायीय प्रतियोगितानिवेश्याधिक्यं स्वमतेनु समवायिस
मवाय रूप संबंधशरीरेऽधिकरणीशे समवाय स्य विशेषण तयातत्र तत्संबंध स्याधि
क्य स्यनिवेशनीय तेनिलाघवानवकाशः यद्यु द्रव्य समवेत प्रत्यक्षादौ संयुक्तसम
वायादि हेतुताकल्पनमफलं अथतदकल्पनेगुणादौ प्रत्यक्षविषयता की द्दशासामग्रीनिय
म्यनिवेश्य प्रतिबंधकाभावविषयादि घटितसामग्री नियम्येव अथैवं सन्निकृष्ट
गुणादेरेवकथं न प्रत्यक्षविषयताउक्तसामग्रास्तत्रापि क्षतत्रादिनिवेश्य नतु
द्दशासामग्रीगुणादिप्रत्यक्षजनने स्वाश्रयभासकसामग्रीसहकारिवैमुख्यने
स्वाश्रयभासकीभूतसन्निकर्षशून्यकाले कदापि गुणादि चाक्षुषाद्यनुदयात्
एवं च गुणाद्यसन्निकर्षद्दशायां स्वाश्रयसन्निकर्षादिरूपसहकारिविरहादेव
न प्रत्यक्षापत्तिः स्वाश्रयाविषयकस्यैव वा युष्मदादीगोचरप्रत्यक्षस्योत्पत्ति

आश्रयभासकसामग्रीसहकारितानसंभवतीतिचेत्तर्हि द्रव्यसमवेतस्यापि नेत्रकूसं
युक्तसमवायस्य हेतुता आस्तां · चक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवेतसम
वायत्वकूसंयुक्तसमवेतसमवायादिहेतुताकल्पनंतुनिःफलमेव · गुणादिगो
चरचाक्षुषस्य गुणादिसमवेतगोचरस्यार्थादेश्चाश्रयविषयकस्यकचि
दप्यनुदयेनतत्राश्रयभासकसामग्रीसहकारितासंभवात् · नचप्रत्यक्ष
विषयतायांद्रियसन्निकर्षाश्रयत्वव्याप्यतयाचक्षुःसंयुक्तसमवायादि
हेतुत्वमप्यावश्यकमितिवाच्यं · ईदृशव्याप्तेरप्रमाणकत्वादिति · तदपिहेय
मेव · तथाहि · गुणादौविषयतासंबंधेनप्रत्यक्षोत्पादनिर्वाहकसामग्र्यां ४
सोआश्रयभासकसामग्रीनिवेशमंतरेणतादृशसामग्रीमूल्यकाळेगु
णादिप्रत्यक्षवारणमसंभवि · व्याप्यत्वेनाभ्युपगतस्यसत्वोपगमेव्यापकोप

नेरावश्यकञ्चात्र- अतः तथाविधसामग्रीव्यासौ तत्रिवेशानन्तरावश्यकैः तत्र यक्षुषाव
छेदेनयद्देशविषयादिघटितासामग्रीनन्तरद्रव्यवृत्तेनरक्षणावच्छेदेनविषय
नयाघटसक्षुसुसघतेदृश्येनाहशासामग्रीव्यासौचक्षुःसंयोगादिघटितश्चयभा
सकसामग्रीकुतानिवेश्यादेशेकालेनाआधेरनाहशाव्याप्तिवक्तव्यगुणादी
नीप्रत्यक्षविषयतानानिर्वहतितत्रचक्षुःसंयोगादिघटितसामग्राअभा
वात्- अंशेनुघटादिचक्षुःसंयोगदृश्यांअसन्निकृष्टपटादिसमवेतगुणा
दिचाक्षुषापत्तिःयेचक्षुःसंयोगादिघटितसामग्रीविशिष्टतत्क्षणावच्छेदेन
पटसमवेतगुणादिचाक्षुषापत्तिःचक्षुःसंयोगादिघटितसामग्रीविशिष्टतत्क्ष
णावच्छेदेनपटसमवेतगुणादावपिविषयादिघटितसामग्रीसत्वात्- अथविषय
सामान्यघटितसामग्राःप्रत्यक्षरूपफलव्याप्यत्वंनस्वीक्रियतेयदाऽतिप्रसक्तिःस्यादयुक्त

ननहि षयेविषयनयाप्रत्यक्षोत्पत्तिनिर्वा हायननहिषयघटितसामग्राएवप्रत्यक्ष रूपफल
व्याप्यत्वेस्वीक्रियते·एवंचपटसमवेतगुणादिव्यक्तिषु ननुव्यक्तिघटितसामग्रीबळा
देवप्रत्यक्षमापादयिष्यसिनचनसंभवति·ननुगुणादिघटितसामग्रीव्यासोका
रणतावच्छेदकप्रत्यासत्त्याएवाधिकरण्यायननुद्रव्यत्वव्यक्त्यात्मकविषयनेत्रसं
योगाद्यात्मकसामग्राएवकाळेनिवेशात्·तदानींचघटचक्षुःसंयोगसत्वेपिएवाधि
करण्यापन्नस्यघटचक्षुःसंयोगादिघटितसामग्राःक्वचिदप्यभावान्नदृष्टिवेलसं·
यद्विषयस्यतन्नव्याप्तेर्लघुनाप्रामाणिकीस्यान्नदोषप्रदर्शितरीत्यानव्याप्ति
र्येन [redacted] विषयंसामग्रीव्यासोनिवेश्यानि
प्रसंगवारणसंभवः·सेवनप्रामाणिकी·एतदनुरोधेननक्लृप्तेनुमहागौरव
प्रसंगः·तन्नव्याप्तेर्नविषयस्याहेतुत्वेनेननरूपेणसामग्रीव्यासोनिवेशः
संभवति·कारणतावच्छेदकरूपाधिक्येनस्वेवसामग्रीघटकत्वादिति·नाहशसाम

५ ५

ग्रीव्याप्तो स्वाश्रयसमवेतसंवेधनविषये चक्षुः संयोगस्यनिवेशनंनुनसेभवति·
सामग्रीव्याप्तो स्वावच्छेदकसंबंधघटितसामानाधिकरण्यसंबंधेनएककारणः परकार
णवैशिष्ट्यनिवेशनियमात्·तस्माद्दुष्टदर्शनावनिवारणायसंयुक्तसमवायादिहेतु
कल्पनमावश्यकमेव·अथरूपत्वादिग्रहक्षानुरोधेनसंयुक्तसमवेतसमवाया
दिहेतुतायाआवश्यकत्वात्तेसंयोगस्संयुक्तसमवाययोर्हेतुत्वेन·द्रव्यगुणादि
चाक्षुषसाधारणसमवेतचाक्षुषत्वादेवचक्षुःसंयुक्तसमवेतसमवायजन्य
तावच्छेदकोपगमात्ततएवद्रव्यगुणादिचाक्षुषादेरप्युपपत्तेः·आत्मतत्सम
वेतग्रहक्षानुरोधेनसंयोगसंयुक्तसमवाययोर्हेतुत्वमावश्यकं·निरवयव
नयाआत्मनितत्समवेतेचद्वित्वसंयुक्तसमवेतसमवायाभावादितिचेत्·आ
त्मामेताहशायुक्त्यामनःसंयोगमनःसंयुक्तसमवाययोर्मानसग्रहक्षहेतुत्व
मापाततः·चक्षुःसंयोगचक्षुःसंयुक्तसमवायादिहेतुताद्रव्यत्वसमवेतचाक्षु

का

षादौ कुतः- अथ द्रव्यादि-चाक्षुष साधारणरूपावच्छिन्नं प्रति चक्षुः संयुक्त समवेत समवाय
हेतुत्वे कपालादि-वाक्षो सन्निहितीय क्षणे घटादि-चाक्षुषा यनुदय प्रसंगः- तद्व्य वहित क्षणे संयुक्त समवेत समवाय घटकी मूत कपालादि विरहेण घटादौ संयुक्त समवे
त समवा यविरहा दिति चेन्न- तदानीं घटादि प्रत्यक्षा नुपगमे क्षणि विरहात्- संयोगा
दि हेतुता मतेपि यत्र कपालादि-चक्षुः संयो गादृश्यो घटोत्पत्तिः तदुत्तर क्षणे घटादि
प्रत्यक्ष स्यापलपनीयतया सामा न्य- अथ त्वदिष्ट श्रौतिमते न्दृष्टि तत्समवेत प्रत्यक्षस्य
संयुक्त समवेत समवाय हेतुतया ऽनिर्वाहात्- संयोग संयुक्त समवाय यार्हेतुत्व माव
श्यक मिति चेन्न- एवमपि परमाणु द्वयणुकौ गीकर्तृ नैयायिकादि मते तद्धेतौ युक्ति
विरहात्- अजाहुः- परमाण्वा दि घटित सन्निकर्षा तूत्पत्ति वीक्षादि चक्षुर्वारणा
यसंयुक्त समवेत समवाय हेतुतायां संयुक्त दलभद्रत्व निवेशनीयं- एवं च
न्दृष्टि तत्समवेत रूपादौ भद्रसंयुक्त समवेत समवाय स्या सत्वान्न व्यभिचार इति द्र

आत्मसमवेतविषयकचाक्षुषत्वसमवेतजन्यतावच्छेदकं वाच्यं. तथा च नद्रव्यगुणा न
दिचाक्षुषनिर्वाहइति संयोगसंयुक्तसमवायहेतुत्वमावश्यकं. अथैवमपि संयोग
हेतुताकल्पनमनर्थकं. द्रव्यत्वसमवेतत्वाचाक्षुषसाधारणद्रव्यसमवेतविषयकचा
क्षुषत्वस्यैव चक्षुःसंयुक्तसमवायजन्यतावच्छेदकत्वोपगमात्. न तत एव द्रव्यचा
क्षुषस्याप्युपपत्तेरिति चेन्न. परमाणुघटितसन्निकर्षान्न पृथिवीत्वादिप्रत्यक्ष
वारणाय संयुक्तसमवायहेतुतायामहत्त्वनिवेशस्यावश्यकतया तद्दिप्रत्यक्षेऽभि
चारवारणाय तज्जन्यतावच्छेदककोटौ द्रव्यसमवेतद्रव्यमहत्त्वनिवेशस्यावश्यक
तया द्रव्यग्रहत्वसंयोगहेतुतायामावश्यकत्वात्. नचमहत्संयुक्तसमवेतसमवा
यजन्यतावच्छेदकं साक्षित्वसमवेतत्वाचाक्षुषत्वसमवेतवाच्यं. नहि द्रव्यभिन्नेयसम
वेतं तच्चाक्षुषं. एवं च पृथिवीत्वादिचाक्षुषस्यतादृशसंयुक्तसमवेतसमवाय

=रूपवत्समवेतसन्निकर्षोद्रव्यसंयोगरूपत्वादिप्रत्यक्षकारणं रूपाद्यनुद्भूतं८

जन्यनावच्छेदकावच्छिन्नतया स्थूलपृथिव्यादिसन्निकर्षदशायां तादृशकारणविरहेणापि
प्रसीभवृत्तिवाच्यं· साद्रिनसमवेतचाक्षुषत्वस्यमहत्संमवेतसमवायजन्यतावच्छे =युक्तस २
दकत्वेचचक्षुरणुकादिरूपस्थूलपृथिव्यादिसन्निकर्षदशायांतदोपपृथिवीत्वादि
प्रत्यक्षानुपपत्तेः· अथपरमाण्वादिघटितसन्निकर्षस्यरूपे पृथिवीत्वादिप्रत्यक्षकारणा
यसंयुक्तसमवेतसमवायहेतुतायांसंयुक्तद्रव्येमहत्वंनविवक्ष्यतेअपिचुसमवेतांशो
लौकिकविषयतासंबंधेनचाक्षुषवर्त्वं· तावतापिचक्षुःसंयुक्तपरमाणुसमवेत
रूपादीनांलौकिकचाक्षुषविषयत्वापत्तेर्वोक्तापत्तिवारणसंभवात्· एवंचनीरू
पाद्यनुद्भूतंरूपसामान्यंकारणतावच्छेदककोटिनिवेशनमप्यनुपादेयं· सम
वेतांशेचाक्षुषविषयतानिवेशेनैवोपपत्तेः· तथाचसद्रिनसमवेतचाक्षुषत्वस्य
संयुक्तसमवेतसमवायजन्यतावच्छेदकत्वेपिनोपदर्शितस्थलेपृथिवीत्वादिप्रत्य

क्षानुपपत्तिः नचाविद्यद्विद्वीक्षे चक्षुःसंयुक्तसमवेतचा क्षुषत्वसमवायस्याक्षनलादिनिसंयुक्तस
मवेतसमवायहेतुतायामहत्वादिनिवेशानमफलं इदंचइत्थंगुणकर्मचाक्षुषसाधारण्यास
चाक्षुषत्वस्यैवचक्षुःसंयुक्तसमवायजन्यतावच्छेदकत्वेनचक्षुषजनकत्वेनाभिसंबंधहेतुतायामानाभा
वइतिचेन्न संयुक्तसमवेतसमवायस्यसंयुक्तसमवेतचाक्षुषत्वसमवायत्वेनहेतुत्वे
सद्विनसमवेतचाक्षुषत्वस्यइत्यभिनेयत्समवेतंतचाक्षुषत्वस्यकालिकसंबंधेनघट
वद्विनीयन्नचाक्षुषत्वादेर्बाजन्यतावच्छेदकत्वाभिसंबंधविनिगमनाविरहेणानैकारण्य
तादवस्थ्यनप्रसंगात् नचसहसंयुक्तसमवेतसमवायत्वेनहेतुत्वमतेविद्यमानेय
समवेतंतचाक्षुषत्वस्यजन्यतावच्छेदकत्वमुपेयतेकिंवाउक्तधर्मिणाभिसंबंधविनिगम
नाविरहोदुर्वारइतिवाच्यं इत्यभिनेयत्समवेतंतचाक्षुषत्वादीनांमहत्संयुक्तसमवेत
समवायजन्यतावच्छेदकत्वोपगमेचतृणादिकाद्यसन्निकर्षकालीनतदीयपृथिवीत्वादि
प्रत्यक्षेव्यभिचारप्रसंगात् तस्मान्महत्संयुक्तसमवायत्वेनहेतुत्वमौचितीमिति स्यादे
तत् इत्यभिनेयत्समवेतंतचाक्षुषंतावद्भिनेतिचक्षुःसंयुक्तसमवेतचाक्षुष

समवायेनद्रव्यचाक्षुषत्वावच्छेदकं प्रति चक्षुःसंयोगत्वेनहेतुता-चक्षुःसंयुक्तसमवायहेतुत्व
चमानाभावः-नचैवंसत्यपिचक्षुःसंयुक्तसमवेतचाक्षुषवनूसमवायस्यजन्यतावच्छेद
कमुपदर्शितरूपंसद्रित्रंयत्समवेतंतच्चाक्षुषत्वंकाठिकसंबंधेनघटवद्रित्रंयसमवे
तंतच्चाक्षुषत्वंवेत्यनाविनिगमनाविरहोवतरतीतिवाच्यं-सद्रित्रचाक्षुषत्वादीनांनया
वेगुणकर्मचाक्षुषासंग्रहप्रसंगात्-नहिनतेचसंयुक्तसमवायहेतुत्वंनस्युपगमात्-
संयुक्तसमवेतसमवायजन्यतावच्छेदकेनगुणादिचाक्षुषसंग्रहस्यावश्यकत्वात्-
अथेतन्मतेद्रव्यमिंद्रियसमवेतंतच्चाक्षुषत्वस्यकिंवामूर्तमिंद्रियसमवेतंतच्चा
क्षुषत्वस्यचक्षुःसंयुक्तसमवेतसमवायजन्यतावच्छेदकमतमुपयंतेइत्यनाविनि
गमनाविरहात्द्रव्यमिंद्रियसमवेतत्वयोर्मिथोविशेषणविशेष्यभावगमि
गमनाविरहाच्चकार्यकारणभावावाहुल्यप्रसंगाद्द्रव्येनद्रक्ष्यतीजातीयसंयु
क्तसमवेतचाक्षुषत्वस्येवनजन्यतावच्छेदकत्वमुचितं-तादृशवेजातेर्द्रव्यत्वाक्ष

वं. तस्मिन्नेव चाक्षुषाभावादिप्रतिबध्यतावच्छेदकं नयाद्गुरुत्वश्यामः एवं च द्रव्यमात्रसमवेतानां गुण
कर्मद्रव्यत्वजातीनां चाक्षुषत्वेन ननानिर्वक्तीतिसंयुक्तसमवायहेतुतात्रल्प
तमावरूपं. नच चक्षुःसंयुक्तसमवायहेतुतामात्रमपि संयुक्तोऽचाक्षुषत्वनिवेशान्न
अन्यथा मावरूपं. एतन्मतेपरमाण्वादिग्रहितसन्निकर्षादृष्टजीवादिप्रत्यक्षतादव
स्थान्. एवं चैतत्सिद्धसाध्यसाधनविचारवारणायद्रव्यसमवेतचाक्षुषत्वं
मेव तत्र्यतावच्छेदकं वाच्यं. तत्र च द्रव्यसमवेतचाक्षुषत्वं मूर्त
त्वसमवेतत्वं चाक्षुषत्वादीनां तथात्वमादाय द्रव्यत्वद्रव्यसमवेतत्वयो
र्निष्प्रतियोगिकत्वेन विशेषणविशेष्यभावेविनिगमनाविरहाद्दुर्वार इति उपदर्शनविनि
गमनाविरहेणचक्षुःसंयुक्तसमवेतसमवायहेतुतावा द्रव्यत्वसहिष्णु
तेवोचितेति वाच्यं. महत्समवेतचाक्षुषत्वस्यैव चाक्षुषवच्चक्षुःसंयुक्त
समवायजन्यतावच्छेदकतायामेवोपदर्शितविनिगमनाविरहप्रसङ्ग

रूपोरसनगन्धस्पर्शशब्देषूत्तरेषु । तर्हि मयाऽयमिन्द्रियसम्बद्धेन चक्षुषा संयुक्तसमवेतसमवायेन द्रव्यत्वं ज्ञातव्यं द्रव्यत्वेन वाच्यं । अथ नु चाक्षुषबुद्धिसमवेतेन चाक्षुषबुद्धिस्थेनेति नोपदर्शितानि निगमनाविरहेणा । चक्षुःसंयुक्तसमवेतसमवायहेतुतावादुल्पत्तिः । अत्रकेचिदाहुः सामान्याद्यवच्छिन्नसन्निकर्षविनागोत्वादिप्रसक्तानुपलब्धयप्रसंगात् । गोत्वादिव्यक्तिविशेषतयाचाक्षुषत्वाद्यवच्छिन्नंप्रतिसामान्याद्यवच्छिन्नचक्षुःसंयोगस्यसमवायादिनाहेतुत्वमावश्यकमितिसंयुक्तसमवायहेतुनासिद्धिः । नचु कार्यागतिसामान्याद्यवच्छिन्नचक्षुःसन्निकर्षकाले तद्द्रव्यवच्छिन्नसन्निकर्षवद्वा व्यक्तिविशेष्यकचाक्षुषापत्तिवारणाय गोत्वप्रकारतानिरूपितविशेष्यतासंबंधेनचाक्षुषंप्रतिसामान्याद्यवच्छिन्नचक्षुःसंयोगस्यसमवायेनहेतुत्वमावश्यकमितिरूपंतादृशचक्षुःसंयोगत्वसमवायहेतुतयेतिवाच्यं । तादृशकार्यतानिरूपणेविशेष्यतासंबंधेनगोत्वेचाक्षुषंतथाविधसंयोगहेतु

मेन गोत्वचाक्षुषं प्रति स्वाश्रय चक्षुः संयुक्त मनः प्रति योगि कर्म जातीय संयोग वत्ये न संबंधेन
सास्त्रा वच्छिन्न चक्षुः संयोग हेतुना याए वोक्ति तत्वात्. ईदृशानुपत्त्या संयुक्त समवायहे
तुत्वाभिधेः अथैवं द्रव्य चाक्षुषादौ चक्षुः संयोगादेरपि उपदर्शिन आत्मनिष्ठ प्रत्या
सत्तेवहेतुत्वं स्वीक्रियते. विषयनिष्ठयासत्तासादरेण रूप भेदेन कारणतावा हुल्यप्रसं
गाहितिचेन्न. तत्रात्मनिष्ठ यत्या सत्या दरेण कथञ्चित्सन्निकर्षात्. अन्यथैतद्रूपस्य क्षणनः
तद्दारणाय विषयाणां विशिष्य निवेशोवा विषयाणां रूपाचे क्षयावा हुल्येनयावेहुन
रकारणानाप्रसंगात्. अत्रचगोत्वादेरेकैकव्यक्तिनयानात्मनिष्ठ संयोगादिनिआत्मनिष्ठ प्रसंग
सासास्त्रावच्छिन्न चक्षुः संयोगादिहेतुनायाए वकल्पनमुचितमिति. अन्ये तुगवाक्षो वे
छिन्न सन्निकर्षात्तत्र सरेणूनां अनुद्देशावच्छिन्न सन्निकर्षाच स्थूलद्रव्याणां चाक्षुष १०
यथा कारणाद्यंत्र सरेणुचाक्षुषेगवाक्षावच्छिन्न चक्षुः संयोगस्यत्वदिभिन्नइव्य चाक्षुषे
१० चस्थूलावयवावच्छिन्न चक्षुः सन्निकर्षस्यविशेष्यदेहुनाकल्पनमावश्यकं. तथा
तादृशसन्निकर्षकाले त्रसरेण्वादिसमवेत रूपादि चाक्षुषवारणायतद्दिसमवेत चाक्षु

तद्भिन्नत्वे सति समवेतत्वात् चक्षुषश्च स्थूलावयवावच्छिन्नचक्षुःसंयोगवत्समवायेन।

यथा गवाक्षावच्छिन्नचक्षुःसंयोगवत्समवायेनेहेत्युक्तावयवकमिति संयुक्तसमवायेनेति
सिद्धिः। गवाक्षावच्छिन्नं चक्षुर्यावत्तारकवर्त्तिसौरतेजुःसंयोगावच्छेदकावच्छिन्नं नेत्रं। नादृष्टसंयोग
स्यविजातीयसंयोगत्वेनैवनियतेः। अतोजालकांतरवर्त्तिसादृष्टिनिवेशेऽपि न क्षतिः। स्थूल
त्वंमहत्त्वं। अथत्रसरेणुसमवेतेनचाक्षुषेणावच्छिन्नंप्रतिगवाक्षावच्छिन्नचक्षुःसंयोग
वत्समवायत्वादिनाहेतुतासंभवतिनदृष्टिसमवेतपृथिवीत्वादेर्घटादिसन्निकर्षाद
पिप्रसक्तोदयात्तदानींचगवाक्षावच्छिन्नचक्षुःसंयोगवत्समवायस्यत्रिरहेणतत्त
दृष्टिभिन्नसमवेतपृथिवीत्वादेश्चत्रसरेणुप्रभवावच्छिन्नसन्निकर्षकालेपिदृष्टौप्रसक्तोद
यात्तदानींचनत्रस्थूलावयवावच्छिन्नसंयोगस्यविरहेणयभिचारात्। नचेगवाक्षा
वच्छिन्नचक्षुःसंयोगत्वसमवायस्यजन्यतावच्छेदकत्वेदृष्टकत्वौचत्रसरेणुनिरूपितलौकि
कविषयतायाःस्थूलावच्छिन्नचक्षुःसंयोगवत्समवायस्यजन्यतावच्छेदकत्वौच
त्तद्भिन्नत्वेदृष्टानिरूपितलौकिकविषयतायानिवेशात्तन्न व्यभिचार इतिवाच्यं। त
त्रनिवेशेपियत्रजन्यीयत्वंदृष्टौगवाक्षावच्छिन्नसन्निकर्षःघटेचस्थूलावच्छिन्नसन्निक

र्षः तत्र ऊर्ध्वीयत्वटिविषयक प्रत्यक्षस्य विषयतया पृथिवीत्वेपुसत्तेः तत्र गवाक्षावच्छिन्न
चक्षुः संयोगवत्समवायस्य तदानीमसत्त्वेन यत्र ऊर्ध्वादौस्थूलावयवावच्छेदेन सन्निकर्षः
गवाक्षावच्छेदेन पार्थिवत्वटौ सन्निकर्षात्तत्वटिभिन्नपृथिवीत्वेन सन्निकर्षः तदानीत्व
टिभिन्नऊर्ध्वादिस्थूलद्रव्यविषयक प्रत्यक्षस्य विषयतया पृथिवीत्वेपुसत्तेस्तत्र त्व
तदानीं स्थूलावयवावच्छिन्नचक्षुः संयोगवत्समवायस्यासत्त्वेन अभिचारस्पष्ट
वीरत्वानुक्तिरेव स्वनिरूपितलौकिकविषयतासम्बन्धेन तत्वटिसमवेतत्वलौकिक
विषयत्वोभयसंबंधेन चाक्षुषत्वावच्छेदकं प्रति गवाक्षावच्छिन्नचक्षुः संयोगव
त्समवायेन स्वनिरूपितलौकिकविषयतासम्बन्धेन तत्वटिभिन्नद्रव्यसमवेतत्वलौकिक
विषयत्वोभयसंबंधेन चाक्षुषत्वावच्छेदकं प्रति स्थूलावयवावच्छिन्नचक्षुः संयो
गवत्समवायेनहेतुत्वात्स्वक्रियोत्पादकीभूतस्थूलयोः पृथिवीत्वेनचाक्षुषव्य
क्रिनिरूपितलौकिकविषयतासम्बन्धेन तत्वटाद्यादिसमवेतत्व

विरहेण नानाद्रव्योभयसंबंधेन तत्र चाक्षुषमुत्पद्यतइति नयुक्तमिति चारटत्या हुः- नहियुक्तं तथाहि.
रूपादितत्समवेतचाक्षुषादौ गवाक्षाद्यवच्छिन्नचक्षुः संयोगत्वंनाद्रव्यसंयोगवत्समवायत्वा
दिनाहेतुनाकल्प्यतेअपिचद्रव्यचाक्षुषंप्रतिविजातीयचक्षुः संयोगत्वेनचाक्षु
षवत्समवेतचाक्षुषंप्रतिचाविजातीयचक्षुः संयोगवत्समवेतसमवायत्वेनगो
वाक्षानवच्छिन्नत्वादिचक्षुः संयोगेऽणुद्रव्येवाच्छिन्नस्थूलावयविचक्षुः संयोगेन
नाद्रव्यजातिविशेषेणकल्प्यतेततःकथंजालकुसलानकल्पकाभावादनेनाद्र
व्यसन्निकर्षात्तत्रसरेण्वादिचाक्षुषप्रसंगः-एवंनाद्रव्यसन्निकर्षद्रव्यांत्रसरे
ण्वादिसमवेतचाक्षुषप्रसंगोपिनास्ति-तदानींतत्रतद्वयवचक्षुः संयोगेवेज्ञा
नस्योपगमेनविजातीयचक्षुः संयोगेसमवेतसमवायविरहात्-न
चयत्रत्रसरेणुचक्षुः संयोगोसान्निद्वितीयक्षणेनस्यतत्समवेतरूपादेश्च
चाक्षुषंजाठीतरयतिसोरतेऽः संयोगनाद्रव्यंतदुत्तरंमपित्रसरेणुतत्था

समवेतचाक्षुषप्रसंगः पूर्वचाक्षुषानुरोधेनतथाविधतद्विचक्षुः संयोगेवेज्ञासत्या
मपीश्वरीकरणीयत्वान्नेतिचेत्तद्विचाक्षुषतत्समवेतचाक्षुषयोर्गवाक्षावच्छिन्नचक्षुः
संयोगतादृशचक्षुःसंयोगवत्समवायेनहेतुत्वौचित्यात्कल्पनमावश्यकमेवेति
वाच्यं·विजातीयालोकसंयोगावच्छेदविजातीयचक्षुःसंयोगत्वतादृशचक्षुः
संयोगयत्वसमवेतसमवायत्वाभ्यामेवइमचाक्षुषत्वचाक्षुषत्वसमवेत
चाक्षुषत्वावच्छिन्नंप्रतिहेतुत्वोपगमादुपदर्शितस्थलेविजातीयालोकसं
योगाविरहेणोपपत्तिविरहात्·नचतदानीमालोकीतरसंयोगसत्वेचाक्षु
षापत्तिर्दुर्वारेत्याशंक्यनीयै·तादृशालोकसंयोगेवेज्ञानभ्युपगमात्·अ
थसंयोगनिष्ठनादृशवेज्ञानेनियामकाभावात्संयोगसामान्यसामग्री १२
तन्नियामकत्वेनिखिलसंयोगानामेवतदाश्रयचक्षुष्प्रसंगः·नचविजातीय

जातिव्याप्यविरुद्धभेदे नाद्ये कथंचोपगम्यते इतिचेन्नानैकमेकं यतोजन्यतावच्छेदकजाते
र्नानात्वेव्यभिचारेणकारणत्वानुपपत्तिः जन्यतावच्छेदकजातिनानात्वेचकार्यकारणभा
वेवाद्याऽसिद्धिरितिक्रियाजन्यतावच्छेदकजातिनानात्वमेवोचितमिति अथलौकिकसन्निक
र्षादिजन्यतावच्छेदककोटौकारणीभूतलौकिकसन्निकर्षत्वेनेश्वरनिरूपितत्वंनसंभवे
दस्मदं अन्यथालौकिकसन्निकर्षविशेषादृष्टविशेषादिसहकृतोपनायकज्ञानात्वे
नाहेतुरगम्यमस्यनदेशेलौकिकस्यैवस्याव्यभिचारस्यदुर्वारत्वात् तन्नलौकिक
लक्षणप्रत्यासत्तेरनुपरंतुसाक्षात्करोमीसाक्षात्कारेसाक्षात्कारित्वस्यानुप
पत्तेः नचसाक्षात्कारित्वंजन्यलौकिकविषयत्वंतत्सन्निकर्षजन्यतावच्छेद
कतयोपगंतव्यं सचताहृशोपस्थाप्यएवेतिनव्यभिचार इतिवाच्यं जन्यता
वच्छेदकतयाविषयविषयतायाविशेषस्वीकारस्यासिद्धौतादृशलक्षणस्यैवंच
ताहृशापरिचारणकारणतावैशिष्ट्यनिवेशस्यावश्यकत्वौचित्यात् एवंच
वच्छेदकजातेर्नानात्वेऽप्यदोषः कार्यकारणभावबाहुल्यस्यकार्यतावच्छेदकजातेर्ना

मात्र

१३

१३

नाक्षेपि सा स्यादिति चेत्- सा सूत्रे व्यभिचारनिया कारणतावच्छेदकजातेरे क्यसिद्धेः कार्यकारणभा
वक्ल्पनागौरवेनस्यादेव- येन श्वक्षुः संयोगनिष्ठप्रत्यक्षजनकतावच्छेदकजातेः क्रियासंयो
गजन्यतावच्छेदकजातिविरुद्धव्याप्यभेदेनद्विले सी योगसंयुक्तसमवेतसमवायसंयुक्त
विशेषणतासंबन्धेनेन्द्रियपुरुषसंबन्धेनचमिलितानांसंयोगघटितसामग्रीकारण
तादेकुण्ये नानैतकारणतावाहुल्यं- क्रियाजन्यतावच्छेदकजात्योः प्रत्यक्षं चक्षुःसं
योगनिष्ठयोर्जातिव्याप्यविरुद्धभेदेनैवक्रियायाः कारणतावाहुल्यंसंयोगस्यचैकैक
कारणतावाहुल्यमिति- केचित्तु प्रत्यक्षजनकतावच्छेदकजातिः संयोगजसंयोग
व्यापत्तेवा ऽतोनक्रियाजनकतावच्छेदकजात्यानवासंयोगजनकतावच्छेदकजासा
संकरप्रसंगः- क्रियाजन्यचक्षुःसंयोगीविनाचनभवत्येवचाक्षुषं- सर्वत्रचाक्षुषा
सादृश्यज्ञेफलवत्तेनक्रियाजन्यचक्षुःसंयोगस्येवकल्पनात्- नचक्रियाजन्यसंयोग
व्यापत्तेवसाजातिः- क्रियाजन्यसंयोगस्यजेयावयवसंयोगाधीनसंयोगीनरोधसेवचा
क्षुषमुत्पद्यतेदूरेवर्किनोपेयतेऽविगमनाविरहादितिवाच्यं- एवंसतिइंद्रियसं

नाक्षेपे

जन्यता

योगनिष्टताद्रव्यज्ञानेरकृप्तयाःकृप्तकल्पनापाताद्.मनसेआत्ममनःसंयोगनिष्टक्रियाऽन्यना
वच्चेद्रव्यजातिव्याप्यज्ञानेरेवचक्षुःसंयोगादारभ्यप्रयुक्तसंयोगादिसाहुः.अचक्षुयत्रकपालो
दौचक्षुःसंयोगोसन्निक्षलोएवघटोस्तिःतत्रतत्क्षणेताद्रव्यासंयोगादक्रियाघट ज्ञा
नचक्षुःसंयोगानसंभवति.घटात्मकसमवायिकारणस्यप्रागसत्वाद्.नचाद्वितीयक्षणो
तक्रियैवपूर्वसंयोगस्यविरोधिनःसत्वाद्.अतस्ताद्रव्यक्रियानारब्धसन्निक्रियांतरोत्प
त्तायावत्ताकालेनघटचक्षुःसंयोगउत्पद्यतेतावत्कर्मनंघटचाक्षुषापत्तापद्रसंग
श्चेतनीयःएवंचविजातीयसंयोगतत्संबंधतत्समवायद्वारेणरूपादिसा
क्षात्कारणायोपदर्शितसंयुक्तसमवायहेतुत्वकल्पनमनादेयमेवेति.अ १४
येतुअर्द्धनिष्पन्नवैशाद्यादौपरिमाणाधिक्यापचाक्षुषाकुद्यादयावद्यत्रसरेण्वधिक्ये नसन्निकर्षसत्वघटजातीयपरिमाणंगृह्यतेतावत्त्रसरेण्वधिकेवेनसंयोगवत्समा
वायस्यतज्जातीयपरिमाणचाक्षुषंप्रतिविरोध्यहेतुसमानजातीयकमितिचक्षुःसंयुक्त १४

समवायहेतुनासिद्धिरिति वक्तव्यं चैतन्नीयं परिमाणविशेषचाक्षुषत्वावच्छिन्नं प्रति
नात्रसरेण्ववच्छिन्नसंयोगत्वसमवायस्यादिसहस्रत्रसरेण्ववच्छिन्नचक्षुःसंयो
गत्वसमवायत्वादिनाहेतुनातदसहस्रत्रसरेण्ववच्छिन्नसन्निकर्षसत्वेपि तादृशप
रिमाणोत्पत्तेस्तादृशपरिमाणवत्तिद्रव्यं चक्षुश्चेत्तत्रसरेण्ववच्छेदेनप्रथमंचक्षुःसं
योगोजायतेतदनंतरमपरत्रसरेण्ववच्छेदेनापरचक्षुःसंयोगोजातःतत्रना
दृशपरिमाणग्रहानुदयप्रसंगः कस्यापिसंयोगस्यतत्रसहस्रत्रसरेण्ववच्छि
न्नत्वविरहात्तु अंतरवयपरिमाणचाक्षुषंप्रतिविजातीयसंयोगत्वसमवायेन त्रावच्छिन्नं
हेतुनातादृशोवैजात्यंचाक्षुषसामान्यजनकतावच्छेदकवैजात्यव्याप्यंजातिरंतरवैजात्यादि च
क्षुःसंयोगेनकल्प्यतेफलाभावादितिनानुपपत्तिः इत्यपिहृदयंनेवउपदर्शितस्थळेप्रथ
चक्षुःसंयोगेनादृशवैजात्यासंभवेनदुरुक्तेर्द्वितीयक्षणेएवनादृशंपरिमाणंचाक्षुषप्र त्रा
संगेनतयोरेकस्मिन्नपितदभ्युपगमासंभवेनऽप्रथमसंयोगसत्वेपितादृशपरिमाण
ग्रहानुपपत्तेश्च अथप्रतिक्षिप्तंकरूपेणतत्तत्रसरेणूनुपादायतत्तत्रसरेण्ववच्छिन्नसं

द्वितीयसंयोगेनदभ्युपगमेवक्ष्यतेऽप्रथमसंयोगोद्वितीयसंयोगानत्वाचक्षुषप्रसंगेन २

योगवत्समवायेन सह स्वादित्वसंख्येष्ववच्छेदकसंसर्गेण संख्यादिकं प्रति समवायस्य हेतुत्वकल्पने-द्रव्यत्वादिकं प्रति द्रव्यत्वादिरूपेण समवायस्य हेतुत्वकल्पनाया गौरवेण तत्तत्कारणतावच्छेदकावच्छिन्नानीतफलोपधायकत्वात्तत्तत्संसर्गः-उपदर्शितस्थले संयोगसंबन्धेन घटत्वेन तावत्कारणतावच्छेदकावच्छिन्नस्यैव सामग्र्यंशत्वे वा नानुपपत्तिः-कार्यतावच्छेदकं तु ननु तत्परिमाणग्रहे चाक्षुषत्वं-ननु तत्तद्द्विजातीयपरिमाणचाक्षुषत्वं-अतो नानुपपत्तिरित्यत्र समवायेन द्रव्यत्वादिजातीयपरिमाणचाक्षुषत्वं तेनैतदवच्छिन्नसंनिकर्षस्य व्यभिचारः-नच तत्तत्परिमाणव्यक्तेरेव कदाचित्तत्तत्समवायेषु व्यक्तिघटितसहस्रत्वसमवायेष्वेवच्छिन्नसन्निकर्षादि [illegible] तद्व्यक्तिघटितताहशीव्यक्त्यं तरघटितसहस्रत्वसमवायेष्ववच्छिन्नसन्निकर्षादपि ग्रहणापत्तेः तत्तत्समवायेष्ववच्छिन्नसन्निकर्षस्य व्यभिचारादनिकर्थत्वात्तत्परिमाणग्रहे तत्तत्समवायेष्ववच्छिन्नसन्निकर्षत्वेनहेतुत्वे
१५ तिवाच्यं-तत्तत्समवायेष्ववच्छिन्नसन्निकर्षऊन्यतावच्छेदकोटौ तत्तत्समवायेनेति रूपितलौकिक १५
कविषयतायाश्चिन्निवेशेन व्यभिचाराभावादितिचेन्न-एवं सति तत्तत्समवायेष्ववच्छिन्नचक्षुःसंयोगस्यैव स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकसंयोगवत्त्वरूपात्मनिष्ठ

प्रत्यासत्यातन्तरिमाणग्रहहेतुत्वमुचितं. अन्यथातन्तुरूपीयत्वविवेचनप्रसंगेनतुरूपत्वेन
नैसप्रसंगात्. विषयनिष्ठप्रत्यासत्यंगीकारेपि विषयीभूतपरिमाणग्रहणेतन्तुरूपत्वे
नोपादानत्वे कथंचक्षुःसंयुक्तसमवायेनद्रव्यत्वेतरग्रहापत्तिसंभवात्. तथा
चक्षुःसंयुक्तसमवायहेतुतासिद्धिः. केचित्तु यत्किंचिदाश्रयसन्निकर्षदशायां
दिक्कालादिव्यावृत्तिधर्मप्रत्यक्षानुदयात्तन्तुसमवेतत्वाचक्षुषत्वावच्छेदकं प्रति इत्य
चक्षुःसंयुक्ततन्तुद्रव्यसमवायत्वेनहेतुत्वकल्पनमावश्यकं. अथतत्कल्पनेपि
कथंगंधाद्यापत्तिर्वारणीयेति. नन्वेवंदिक्कालादिचाक्षुषस्यापिसन्निकृष्टाश्रयघटित स
न्निकर्षस्यापिकार्यतावच्छेदकाक्रांतत्वान्नादृष्टाद्यापत्तिरिति वाच्यं. नादृष्टाद्य
क्तिर्घटितसन्निकर्षविनाधिष्ठानघटितसन्निकर्षघटितसामग्रीरूपादौदिक्का
दिव्यक्त्यैतरेषुचस्वीयकार्यतावच्छेदकावच्छेदोत्पादनात्. नादृष्टासामग्र्याश्चनष्टा
त्वादौतदानीमपिसत्वेनतत्तद्व्यक्तिघटितसन्निकर्षकार्यतावच्छेदकावच्छेदप्रसंगः. कथं

विद्यविचारणासंभवादिति चेन्न तत्र व्यक्तिसमवेतान्यत्वविषयत्वसंबंधेनैतत्व्यक्तिसमवेत
भेदादिना हेतुतायामपि कल्पनीयत्वात्तत्र व्यक्तिसमवेत[illegible]द्विवार्थेतरदृक्षत्वादि
कसामग्र्यांतर्हेतुव्यक्तिसमवेतभेदस्यापि तर्भावात्तुतादृशसामग्र्यास्तर्हेतुव्यक्ति समवेत
द्विवादृशभावेनापि संभवादिति चेत्। तदपि न कारणतावच्छेदकावच्छेदेनतत्तदाश्रयाणां
नत्वव्यक्तिर्हेतुर्निवेशौचित्यादुपदर्शितमुक्त्यातत्तदाश्रयचक्षुःसंयोगस्यैवोपदर्शनात्
तन्निष्ठप्रत्यासत्तेर्हेतुत्वौचित्यात्तत्संयुक्तसमवायहेतुतायामसिद्धेः। वस्तुतस्तत्र
किंचिद्धर्म्याश्रयसन्निकर्षस्यार्थापत्तिद्विवादिप्रत्यक्षवारणायोपदर्शितत्वेऽपि सन्निकर्षहेतु
तानवकल्प्यते। तथासत्यनेनकार्यकारणभावप्रसंगात्। किंतु द्रव्यान्यत्वविषयत्वा
संबंधेनचाक्षुषत्वावच्छिन्नंप्रतिसामान्याधिकरण्यसंबंधेनचक्षुःसंयोगाभावत्वे
नैकंप्रतिबंधकंकल्प्यते द्विवादेर्यत्किंचिद्धर्म्याश्रयसन्निकर्षद्वारायैनतद्धर्म्याश्रये १६
यत्समवेतद्रव्यत्वेनचक्षुःसंयोगाभावस्यतद्विवादेःसामान्याधिकरण्यसंबंधेनसत्वा १६
नप्रत्यक्षापत्तिः। यावद्धर्म्यसन्निकर्षंविनापीदृग्जातीयचाक्षुषोत्पत्त्यापत्तिवारः स्या

न द्रव्यारम्भकाय द्रव्याय सह वर्तितुं स्वविषयान्निवर्तन्ते । न चक्षुःसंयोगवदपि चक्षुःसंयोगाभावस्या
व्याप्यवृत्तेर्नसंबन्धेनापि द्वित्वादि चाक्षुषं नस्यात् । नियमनएवसामानाधिकरण्यसंबन्धेनेषु
प्रतिबन्धकत्वमस्त्वादितिवाच्यं । स्वसमानाधिकरणैकत्वसंबन्धावच्छिन्नप्रतियोगिना
कं न चक्षुःसंयोगाभावस्येव यत्तिबन्धकतयातेन संबन्धेन चक्षुःसंयोगस्याव्याप्यवृत्तित्वात्
तत्संबन्धावच्छिन्नप्रतियोगिनाकेनद्रव्यस्यापि नथात्वेनानुपपत्तेः समवायेति । केचित्तु के
वलनीलाद्यवयवावच्छिन्नसन्निकर्षात्तत्रित्रप्रत्यक्षवारणायतन्नीलाद्यवयवावच्छि
न्नचक्षुःसंयोगवत्समवायेनहेतुतायाआवश्यकत्वादितिसंयुक्तसमवायहेतुतासि
द्धिरित्याहुः । तदपिन । नवीनेश्चित्ररूपस्येवानभ्युपगमात् । न चैकचित्रस्थलेऽव्याप्यवृ
नानारूपमंगीकुर्वतांनव्यानामनेपीतादृशंवच्छिन्नसन्निकर्षात्नीलादिप्रत्यक्ष
वारणायनीलादिचाक्षुषंप्रतिनीलाद्यवच्छिन्नचक्षुःसंयोगवत्समवायेनहे
तुतायाआवश्यकत्वात्संयुक्तसमवायहेतुतासिद्धिर्निरस्तेतिवाच्यं । अ
वच्छिन्नत्वंचाक्षुषंप्रतिस्वावच्छेदकावच्छिन्नत्वंसंबन्धेनचक्षुःसंयोगत्वेनहे

नु तयैव तादृशापत्तिवारणसंभवात्। नीलावच्छिन्नचक्षुःसंयोगवत्समवायत्वादिनाविशिष्यदूषणाकल्प
नस्यानिर्युक्तिकत्वात्। विवेचितं चैतद्विस्तरेण। यदि तु संयुक्तसमवायस्यापि तुल्ययत्नकयात्त
दानीं चक्षुःसंयोगः तदुत्तरक्षणे प्रत्यक्षं चक्षुःसंयोगाबलात्स्यात्। न तु तदानीं यु
क्तद्रव्यादिज्ञानेर्गुणादेश्च। तदानीं तत्र चक्षुःसंयुक्तसमवेतसमवायस्य तद्घटकी
भूतकपालतदादिचक्षुःसंयोगयोर्विरहेणाभावात्। तथा च धर्मविषयके धर्मिप्रत्यक्ष
मापद्यतेनेन। नचैतत्किञ्चिदभ्युपैति। अथसत्ताजातेः प्रामाणिकत्वेतदानीं चक्षुः
संयुक्तसमवेतरूपादिसमवायस्य तत्रापि क्षततयातादृशधर्मत्वभासेतनकथंय
टादिधर्मविषयकंघप्रत्यक्षापत्तिरितिचेमतेएवमपितदानींमाश्रयाविषयकरूपत्व
नीलत्वादिप्रत्यक्षापत्तिर्दुर्वारैव। नचेष्टापत्तिः। आश्रयाविषयकजातिप्रत्यक्षस्यासिद्धौ
नाभिसङ्घत्वात्। तत्संयुक्तसमवायेनत्वमात्वरूपकर्मवेत्याहुः। तदपि न। विजातीय १७
यसंयोगनद्रव्यसमवेतसमवाययोरवयवेक्षजनकतयातदानींचघटे विजातीयसंयोगानभ्यु
पगमेनघटतत्समवेतसमवेतरूपत्वनीलत्वादिप्रत्यक्षासंभवात्। आश्रयाविषयकजा

तिप्रसङ्गापत्तिविरहात्। उक्तं तत्तदानीं तत्र चक्षुःसंयोगएवाभावाधिकरणसामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिकाभावः चाक्षुषरूपकर्मत्वस्य तत्राभावाधिकरण्यात्। चक्षुःसंयोगे चक्षुर्जातिरिक्तप्रमाणस्य दुर्बलत्वात्। अतीन्द्रियतया चक्षुःसंयुक्तसमवेतसमवायहेतुतया न संयुक्तसमवायान्यथासिद्धिः। तस्यैवाभावस्वरूपकथनात्। न चैतदकल्पनेसन्निकर्षविनैव गुणकर्मगतसामान्यप्रत्यक्षापत्तिरितिवाच्यं। यतस्तत्कल्पनेपि द्विधादिरूपाद्यसञ्जकत्वादिगुणग्राहकयावदाश्रयसन्निकर्षभूयःकाले घटादिद्रव्यश्रवणसन्निकर्षात्तद्विजातिप्रत्यक्षापत्तिवारणाय च चक्षुःसंयोगाभावस्य सामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताकाभावः सामानाधिकरण्यसंबन्धेन द्रव्यसमवेतचाक्षुषबुद्धावधिनीप्रतियोगितावच्छेदकं हेतुर्वाच्यः। यद्धीचिरव्यवधानाद्धि चक्षुःसंयोगाभावस्य सामानाधिकरण्यसंबन्धेन घटादौ सर्वकालेतादृशाच चक्षुःसंयोगाभावाभावस्य सामानाधिकरण्यसंबन्धेन यद्बुद्धावसत्वेनतदानीं तत्र चाक्षुषव्यभिचारःस्यात्तद्वारणाय द्रव्यसमवेतविषयकत्वस्य कार्यतावच्छेदकत्वकल्पनेपि चैत्रः। एवं चक्षुषा रूपप्रत्यक्षनिर्वाहेपि तत्र चक्षुषा रूपप्रत्यक्षवारणमिति एवं संभवतितदानीं तदाश्रयसामानाधिकरण्यसंबन्धावच्छिन्नप्रतियो

लौकिकचक्षुःसंयोगाभावाभावस्यासत्वेनतत्रसामान्याधिकरण्यसंबंधेननदृश्यत्वादिति अथद्रव्यान्यसमवेतत्वस्यजन्यतावच्छेदकोटौनिवेश्योद्रव्यत्वावच्छिन्नप्रतियोगिताकभेदघटकीभूतविशेषणानी
विशेषणाविशेष्यभावेविनिगमनाविरहेणकारणतावाहुल्यंअवच्छेदकगौरवंचेति लाघवात्
गुणसमवेतचाक्षुषत्वस्यैवतथात्वौचित्यात् नचैवंचक्षुर्गतजातिप्रत्यक्षानुरोधेनसं
युक्तसमवेतसमवायस्यहेतुत्वकल्पनमावश्यकमितिचेत्न द्रव्यान्यत्वगुणत्वेउचक्षुर्ग्राह्या
वच्छिन्नजातिविशेषप्रकारकत्वेवगुणकर्मणोर्निवेशनीयतयाकर्मत्वजातिप्रत्यक्षा
नुरोधेनापिसंयुक्तसमवेतसमवायहेतुतासिद्धेः नचातीन्द्रियरूपादिघटितसन्निकर्षद्व
ारायांरूपत्वादिनाचक्षुर्वारणायचक्षुःसंयुक्तसमवेतचाक्षुषवस्तुसमवायत्वेनहेतुत्व
कल्पनमावश्यकमेवेतिवाच्यं चाक्षुषवस्त्वाश्रयत्वसंबंधेनचक्षुःसंयोगाभा
वाभावहेतुतयैवतादृशस्थलेरूपत्वादिचाक्षुषवारणसंभवात् आवश्यकंचच १८
क्षुःसंयोगाभावाभावहेतुतावच्छेदकसंबंधमध्येचाक्षुषविषयतानिवेशनं अ
न्यथाचक्षुर्ग्राह्यद्रव्यादेर्यत्किंचिदाश्रयमात्रसन्निकर्षद्वारायांअतीन्द्रियद्रव्यादेर्या

१८

वदाश्रयसन्निकर्षदशायांचक्षुः संयुक्तसमवेतत्वाचक्षुषवत्समवायस्यनादृशत्वाच्चक्षुः संयोगाभा
वाभावस्यकारणतावच्छेदकप्रयासस्याहित्वलाघौसत्वेनतत्प्रत्यक्षवारणस्याशक्यत्वात्
एवंचाग्निसंयुक्तायांसंयुक्तसमवेतसमवायहेतुतायांसंयुक्तसमवायहेतुकभावेऽप्र
त्यक्षेऽन्यथाद्रव्यसमवेतजातिचाक्षुषस्यसन्निकर्षभूयस्कालेवारणीसंभवात्
तत्रचक्षुः संयोगाभावाभावस्यविशेषणतायाप्रयासस्यासामानाधिकरण्यप्रयासस्या
हेतुत्वाभावादिति. अत्रेदंवयमः द्विविधादेर्यत्किंचिदाश्रयसन्निकर्षदशायांहित्वला
दिप्रत्यक्षवारणायविजातीयसंसर्गेणचक्षुषत्वावच्छेदकंप्रतियोगितयोपस्थितिरपेक्षणीयचक्षुः संयोगाभावा
भावहेतुर्नकल्प्यतेपरंतुजातिचाक्षुषत्वावच्छेदकंप्रतियोगितयोपस्थितिरपेक्षणीयचक्षुः संयोगाभावा
षत्वावच्छेदकंप्रत्येववास्वरूपसंबंधाभावप्रतियोगितयोपस्थितिरपेक्षणीयाचक्षुषंतद्विषयसमवे
तत्वसंबंधेनसंनिकर्षेणहेतुत्वाकल्प्यते. यद्वाद्रवित्वादिचाक्षुषंसामग्रीसमवधा
नंतद्वद्रवित्वादावीदृशंसंबंधेनहेतुर्वर्ततेतद्रूपबद्धितीक्ष्णेरसेनद्रवित्वादिचा

क्षुषस्य तत्रागभावस्य च तत्क्षणे सत्त्वकौ कालिकसंबंधेन तत्तेस्तादृशकृतेः स्वत्वनिरूप्यागभावस्य
नियोगिस्वत्वनिरूपकचाक्षुषविषयसमवेतत्वसंबंधस्यद्रव्यत्वादौ सत्त्वात्तद्द्रव्यत्वादेर्यत्किंचिद्द्रव्या
श्रयमात्रसंसर्गकाले चनेतादृशसंबंधेनद्रव्यत्वादौकृतिर्वर्तते यावद्द्रव्याश्रयसंसर्गिकर्षा
विरहेण तद्द्रव्यबहिर्नोत्तरक्षणेद्रव्यादिवाक्षुषानुदयात्तदानींतनकृतिरपिचाक्षुष
विषयसमवेतत्वस्यद्रव्यत्वादावभावात्-नवद्रव्यत्वादौचाक्षुषोत्पत्तिकालेतद्गुर्वक्षणो
त्पन्नकृतेरीदृशसंबंधेनद्रव्यत्वादौसत्त्वात्तदानीमेवयत्किंचिद्द्रव्याश्रयसंसर्गिकर्षवि
रहेणतद्द्रव्यबहिर्नोत्तरक्षणेद्रव्यादिवाक्षुषानुदयात्तदानींतनकृतिरपिचाक्षुषं तत्रतादृशकृतिरूपस्यकार्य
कालेसत्तायामपिकालोपाधावेतत्रत्योपगन्त्रेनतदानीतादृशकृतेर्नात्रोनतत्र उ
क्षेपणत्वसंभवात्- अवश्यंकल्पनीयश्चतादृशकार्यकारणभावः अन्यथात्रोत्वा
त्रौचैसंयुक्तसंयोगप्रतिबंधकीभूतपित्तद्रव्यादिसंयोगसत्त्वेयंशुक्लरूपाद्यविषयक
स्यशुक्लत्वादिजातिप्रत्यक्षस्यप्रकारीनरेणदुर्वारत्वात्- मधुरत्वादिरूपंरूपत्वा शु

१७

दिनाऽऽश्रयनएवभवेत्तुश्चेतःशीरवइत्यादिप्रतीतिवारणायशुक्लत्वादिजातिविशेषस्यग्रह
एवपित्वादिरूपदोषस्यप्रतिबंधकत्वंनाकल्प्यतेइति-तदसत्-शुक्लत्वादिग्रहेदोषस्यप्र
तिबंधकत्वेशीघ्रादोषेनद्रव्यसंयोगदशायांतत्रद्रव्यशुक्लरूपादिमद्द्रव्यांतरस्यस
न्निकर्षसत्वेपितादृशजातियहानुपपत्तेः-नचशुक्लत्वादिप्रकारतानिरूपितविशे
ष्यतासंबंधेनचाक्षुषंप्रतिसामानाधिकरण्यसंबंधेनपिनद्रव्यादिसंयोगा
स्यप्रतिबंधकत्वंकल्पते-अतोपदृष्टिनस्थलेसामानाधिकरण्यसंबंधेनपिनद्र
व्यादिसंयोगसूत्यशुक्लरूपाद्यंतरेशुक्लत्वादिग्रहोनानुपपन्नइतिवाच्यं-एवंस
तिनद्रव्यादिधर्म्यंतरसन्निकर्षविरहेपिशुक्लत्वादिनिर्विकल्पकापत्तेः-तस्मा-शु
क्लत्वादिजातियहेदोषस्यप्रतिबंधकतानसंभवतीतिशुक्लादियहएवनस्यप्र
तिबंधत्वमुपगंतव्यं-तथाचोपदृष्टिनस्थलेशुक्लाद्यविषयकशुक्लत्वादि

ग्रहस्य दुर्बारतयानाद्दशकार्यकारणभावकल्यनभावश्य कै॰ एवमईनिरवानवैग्रादोपरिमाणनि
शेषग्राह्यकविलक्षणसन्निकर्षाभावेननेंग्रहेपितद्दक्तिपरिमाणत्वाद्यानरजातिविशेषग्रहापत्ति
र्दुर्वारैवेतितद्दारणायायुक्तकार्यकारणभावकल्यनभावश्य कै॰ ननुतत्रजातिविशेषग्रह
एवविलक्षणहेतुनाकल्यतेपरिमाणग्रहस्तुपरिमाणत्वादिनाहेतुनतथैवऽन्यतइतिवाच्यं॰ ना
द्दशजातिविशेषग्रहेसन्निकर्षस्यविशिष्य हेतुत्वोपक[illegible]मेपिअईनिरवानवैग्रादोसन्निक
र्षद्दशायीतत्कल्यपरिमाणवतिद्रव्यान्तरेअर्थान्तरजातिग्राहकविलक्षणसन्निकर्षः तत्रता
दृशद्रव्यान्तरद्दवाईनिरवानवैग्रादावपिसादृश्येजातावविशिष्टपरिमाणग्रहापत्तिः अन
त्यादृशपरिमाणग्रहेपिविलक्षणसन्निकर्षहेतुनायाअवश्यकल्पनायाएवो
जात्यग्रहेविशिष्यसन्निकर्षहेतुनामुपेक्ष्योयदाश्रितकार्यकारणभावकल्यनायाएवो
चितत्वात्॰ इत्थंचनादृशक्तिहेतुतयैवासन्निकर्षद्दशायोद्दश्यत्वनिरवछिन्नज्ञानीना २०
मपिप्रसक्षवारणीसंभवति॰ एवमसन्निकृष्टगुणकर्मणोश्राश्रुपादिकंयाकुचिदका
श्रयसन्निकर्षजन्यंहित्वादिप्रसक्षवारकंचक्षुः संयोगाद्यभावप्रतिबंधकतयाद्दश्या

न्यसमवेतत्वाच्चक्षुषस्त्वपदर्शितलक्षणानि रूपित्वकार्यत्वाद्यभेदकत्वेतादृशकारणत्वाभ्यां
ग्राह्यग्रहणाभिन्नत्वेचक्षुरादिसंयुक्तसमवायस्यनत्संयुक्तसमवेतसमवायस्यचहेतुत्वेनिर्मुक्ति
कमेवतदर्थंनिष्कर्षःग्राह्यग्रहकचक्षुस्वचोःसंयोगएवहेतुःनतुसंयुक्तसमवायसंयुक्त
समवेतसमवाययोः-किंतुद्रव्यत्वसामान्यचक्षुष्टद्रव्यत्वसत्त्वाद्रीनत्वावच्छिन्नंप्रतिसामानाधिक
रण्यंसंबंधावच्छिन्नंप्रतियोगितासंबंधश्चक्षुःसंयोगाभावाभावःत्वक्संयोगाभावाभावोविशेषण
तयाविशेषणहेतुःजातिश्चाक्षुषत्वंजातिस्त्वाद्रीनत्वावच्छिन्नंप्रतिस्वत्वनिष्ठात्यन्ताभावत्वप्रतियोगि
त्वनिश्चाक्षुषविषयसमवेतत्वंतादृशस्याद्रीनविषयसमवेतत्वंप्रसाक्षात्प्रतिहेतुः-घ्रा
णरसनयोस्तुसंयुक्तसमवायएवहेतुःनतुसंयोगःनयाईग्राह्यकत्वात्-नापिसंयुक्त
यह कसमवेतसमवायःगंधरसंप्रतिवैधर्म्यभूतदोषादिसमवधानदशायांहेतुविषय
कगंधत्वरसत्वादिप्रत्यक्षत्वापत्तिःघ्राणजप्रत्यक्षेस्वत्वनिष्ठात्यन्ताभावप्रति
योगिघ्राणजप्रत्यक्षविषयसमवेतत्वंतथाविधरासनप्रत्यक्षविषयसमवेतत्वंप्र

त्यासन्निध्यो क्तिर्हेतुत्वकल्पनावश्यकतयानतएवासन्निकृष्टगंधरसरूपस्पर्शसंयुक्तसमवायस्यचकार्यतावच्छेदकंगंधविषयकघ्राणजन्यं नतु
णसंभवात्. घ्राणसंयुक्तसमवायस्यचकार्यतावच्छेदकंगंधविषयकघ्राणजन्यं नतु
द्रव्यसमवेतविषयकघ्राणजन्यं. गंधातिरिक्तद्रव्यसमवेतस्यघ्राणेनाग्रहणात्. ए
वंरसनसंयुक्तसमवायस्यजन्यतावच्छेदकंरसरसनत्वमेव. नतुद्रव्यसमवेतरस
सनत्वं. रसातिरिक्तद्रव्यसमवेतस्यरसनेनाग्रहणात्. श्रोत्रग्रहणासन्नेश्र
ग्रस्पर्शहेतुत्वेमानाभावः. तथाहि. श्रोत्रस्यसमवायसमवेतसमवायादिरेवग्रहा
सन्निः. नहितुताचशब्दतत्समवेतत्वादिग्रहेतत्रयादिविषयादिघटितेनरसा
मग्रीसंवलनदृशायांसमवायरूपग्रहासन्निविरहात्. शब्दादिग्रहस्यानुपपादः २१
कदाचित्स्यात्. नतुहितुताग्रामाणिकीस्यात्. नदेवम्. शब्दादिसत्वेनत्वनहाश्रय
२१ रूपश्रोत्रेंद्रियसमवायादिव्यतिरेकस्यैवासंभवात्. अथैतद्गवस्थिनेनकुंसा

विलक्षणसन्निकर्षभूयस्त्वाळेऽभ्यमानसामान्यहेतुभूतात्ममनःसंयोगादिरहितेऽपि
मानसस्यापि ज्ञानस्यैश्वर्यवान्. अथैकेनर्षिणा आत्ममात्रस्यैवात्मसमवेतज्ञानाद्देर
आत्मनि चाक्षुषादिमत्वे चाक्षुषत्वादेरप्यर्थग्रहणावारणाय आत्मद्रव्यविषयतासंबंधेन तदु
रूपीयमानं प्रति तदुरूपीयमनःप्रतियोगिकविजातीयसंयोगवे
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेनप्रतिबाधादपि जातीयसंयोगव
त्समवायेन तद्गुणसमवेतरूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रति
बाधात्संयोगवत्समवेतसमवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्म
रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजा
तीयसंयोगस्वरूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनः प्रतियोगिकविजा
तीयसंयोगस्वरूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधात्संयो
गवत्समवेतसमवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्मसमवेत
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजातीयसंयोगस्व
रूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनःप्रतियोगिकविजातीयसंयोगस्वरूप
तदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधात्संयोगवत्समवेत
समवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्मसमवेतत्वमात्रस्यैवात्मसमवेतज्ञानादेर
आत्मनि चाक्षुषादिमत्वे चाक्षुषत्वादेरप्यर्थग्रहणावारणाय आत्मद्रव्यविषयतासंबंधेन तदु
रूपीयमानं प्रति तदुरूपीयमनःप्रतियोगिकविजातीयसंयोगवे
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधादपि जातीयसंयोगव
त्समवायेन तद्गुणसमवेतरूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रति
बाधात्संयोगवत्समवेतसमवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्म
रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजा
तीयसंयोगस्वरूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनःप्रतियोगिकविजा
तीयसंयोगस्वरूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधात्संयो
गवत्समवेतसमवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्मसमवेत
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजातीयसंयोगस्व
रूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनःप्रतियोगिकविजातीयसंयोगस्वरूप
तदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधात्संयोगवत्समवेत
समवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. एवमात्मसमवे
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजातीयसंयोगस्व
रूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनःप्रतियोगिकविजातीयसंयोगस्वरूप
तदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतिबाधात्संयोगवत्समवेत
समवायेनैवोत्पत्तिकल्पनमावश्यकमिति चेन्न. आत्मसमवेत
तद्रूपविषयतासंबंधेन तदुरूपीयमानसत्वावच्छेदेन प्रतियोगिकविजातीयसंयोगस्व
रूपतदुरूपधर्मेणासमवायसंबंधेन तदुरूपीयमनःप्रतियोगिक

२२

विजातीयसंयोगवत्समवायत्वेनगुरुत्वाहेतुत्वकल्पनायांक्षयातेनसंबंधेनतद्धर्मावच्छिन्नंप्रति
~~मनःसंयोगंविजातीयसंयोगवत्समवायत्वेनगुरुत्वाहेतुत्वकल्पनायांक्षयातेनसंबं~~
धेनतद्धर्मावच्छिन्नंप्रति आधेयतासंबंधेनतदात्मत्वेनहेतुत्वमेवाभ्यधीयतामानस
वारणायकल्पितुचितं. एवंगुणसमवेतत्वंविषयतासंबंधेनतादृशमानसत्वाव
च्छिन्नंप्रतिमनःप्रतियोगिकविजातीयसंयोगत्वसमवेतसमवायत्वेनगुरुत्वाहेतुत्व
कल्पनायांक्षयातेनसंबंधेनतद्धर्मावच्छिन्नंप्रति आधेयतासंबंधेनतदात्मत्वसमवे
तत्वेनहेतुत्वमेवाभ्यधीयतामाश्रयनाशेद्रव्यनाशेवाद्रव्यनाशेवादेग्रहणवारणायकल्पितु
मुचितमितिमनःसंयोगादिहेतुनामौनयुक्तिलेशोपीतिकुतोविस्तारेण. विशेषणा
नाविशेषणत्वनित्यत्वसमवायप्रतियोगित्वकारणत्वादिपदार्थानांप्रत्यक्षे
न्द्रियसंबद्धविशेषणतायाहेतुःतद्भूतकंसंयोगसमवायादिरूपंलौकिकप्रत्यक्षेप्र
योजकंसंबंधःहेरिकविशेषणताविशेषः. नलुकालिकविशेषणतादिः. एवंच

संयुक्तविशेषणतासंयुक्तसमवेतविशेषणतासंयुक्तसमवेतस[illegible]विशेष[illegible]तासमवेतविशेषण
तासमवेतसमवेतविशेषणतेंद्रियविशेषणतेंद्रियसंबंधवैशिष्ट्यमिंद्रियसंबद्धविशेष
णतावहुविधेऽपितद्धेतुनाचक्षुषेणद्रव्यसमवेतसमवेतसमवेतत्वादेरपिभावात्तदादिरि
त्यभावग्रहणेवोध्यः कार्यकारणभावश्चेंद्रियजन्यत्वंचाक्षुषादौचक्षुःसंयुक्तविशेषणता
दिरूपेणवोध्यः शक्तिश्चविशेषणताविशेषावच्छिन्नाग्राह्या अतोनरूपादिग्रहेऽव्य
भिचारः अथविशेषणताविशेषणेंद्रियजन्यनिष्ठगुणान्यतरत्वादेर्घटसंयोगादिविशि
ष्टगुणसंयोगावच्छिन्नप्रतियोगिताकसंयोगादिरूपस्यचक्षुरादिसन्निकर्षशून्यकाले[illegible]गुण्य
दितत्सन्निकर्षोत्पन्नस्यक्षोत्पत्तेस्तदानींचनत्वंचक्षुःसंयुक्तविशेषणताविरहेणाव्याप्ति
रितिचेन्न इंद्रियविषयतानिरूपितविशेषणताविशेष्यतासंसर्गकविषयितानिरूपितवि
षयतासंबंधेनचाक्षुषसावच्छिन्नंप्रतिचक्षुःसंयुक्तविशेषणतात्वंहेत्वंतरंतुगौरवा
निर्धयामुष्यत्वेभानादुपदर्शितप्रत्यासत्तीनादृशान्यतरत्वादेरप्रत्यक्षोपपत्तेः एवंरूपत्वभा
वीयोनिर्विकल्पकस्यासंग्रहइतिना[illegible]रूपीयप्रभावस्यसविकल्पकमात्रवेद्यत्वात्तत्रैवांतर्भावे

२३

२३